# Shri Durgastavah

# શ્રીદુર્ગાસ્તવઃ

## Document Information

Text title : durgAstavaH 2 by Shri vAdirAja

File name : durgAstavaH2vAdirAja.itx

Category : devii, devI, durgA, vAdirAja

Location : doc_devii

Author : Vadiraja

Latest update : December 30, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 31, 2020

*sanskritdocuments.org*

Shri Durgastavah

# શ્રીદુર્ગાસ્તવઃ

સન્નદ્ધસિંહસ્કન્ધસ્થાં સ્વર્ણવર્ણાં મનોરમામ્ ।
પૂર્ણેન્દુવદનાં દુર્ગાં વર્ણયામિ ગુણાર્ણવામ્ ॥ ૧॥

કિરીટહારગ્રૈવેયનૂપુરાઙ્ગદકઙ્કણૈઃ ।
રત્નકાઞ્ચ્યા રત્નચિત્રકુચકઞ્ચુકતેજસા ॥ ૨॥

વિરાજમાના રુચિરામ્બરા કિઙ્કિણિમણ્ડિતા ।
રત્નમેખલયા રત્નવાસોપરિ વિભૂષિતા ॥ ૩॥

વીરશૃઙ્ખલયા શોભિચારુપાદસરોરુહા ।
રત્નચિત્રાઙ્ગુલીમુદ્રા રત્નકુણ્ડલમણ્ડિતા ॥ ૪॥

વિચિત્રચૂડામણિના રત્નોદ્યત્તિલકેન ચ ।
અનર્ઘ્યનાસામણિના શોભિતાઽઽસ્યસરોરુહા ॥ ૫॥

ભુજકીર્ત્યા રત્નચિત્રકણ્ઠસૂત્રેણ ચાઙ્કિતા ।
પદ્માક્ષિણી સુબિમ્બોષ્ઠી પદ્મગર્ભાદિભિઃ સ્તુતા ॥ ૬॥

કબરીભારવિન્યસ્તપુષ્પસ્તબકવિસ્તરા ।
કર્ણનીલોત્પલરુચા લસદ્ ભ્રૂમણ્ડલત્વિષા ॥ ૭॥

કુન્તલાનાં ચ સન્તત્યા શોભમાના શુભપ્રદા ।
તનુમધ્યા વિશાલોરઃસ્થલા પૃથુનિતમ્બિની ॥ ૮॥

ચારુદીર્ઘભુજા કમ્બુગ્રીવા જઙ્ઘાયુગપ્રભા ।
અસિચર્મગદાશૂલધનુર્બાણાઙ્કુશાદિના ॥ ૯॥

વરાભયાભ્યાં ચક્રેણ શઙ્ખેન ચ લસત્કરા ।
દંષ્ટ્રાગ્રભીષણાસ્યોત્થ હુઙ્કારાર્દિતદાનવા ॥ ૧૦॥

ભયઙ્કરી સુરારીણાં સુરાણામભયઙ્કરી ।
મુકુન્દકિઙ્કરી વિષ્ણુભક્તાનાં મૌક્તશઙ્કરી ॥ ૧૧॥

સુરસ્ત્રીકિઙ્કરીભિશ્ચ વૃતા ક્ષેમઙ્કરી ચ નઃ ।
આદૌ મુખોદ્ગીર્ણનાનાઽઽમ્નાયા સર્ગકરી પુનઃ ॥ ૧૨॥

નિસર્ગમુક્તા ભક્તાનાં ત્રિવર્ગફલદાયિની ।
નિશુમ્ભશુમ્ભસંહર્ત્રી મહિષાસુરમર્દિની ॥ ૧૩॥

તામસાનાં તમઃપ્રાપ્ત્યૈ મિથ્યાજ્ઞાનપ્રવર્તિકા ।
તમોભિમાનિની પાયાદ્દુર્ગા સ્વર્ગાપવર્ગદા ॥ ૧૪॥

ઇમં દુર્ગાસ્તવં પુણ્યં વાદિરાજયતીરિતમ્ ।
પઠન્વિજયતે શત્રૂન્મૃત્યું દુર્ગાણિ ચોત્તરેત્ ॥ ૧૫॥

॥ ઇતિ શ્રીવાદિરાજયતિકૃતઃ શ્રીદુર્ગાસ્તવઃ સમ્પૂર્ણઃ ॥

*Shri Durgastavah*

pdf was typeset on December 31, 2020

Please send corrections to *sanskrit@cheerful.com*